अथ विषाणां चिकित्सा। तत्र स्थावरविषस्य चिकित्सा।
"स्थावरेण विषेणार्त्तनरं यत्नेन वामयेत्।
वमनेन समं नास्ति यतस्तस्य चिकित्सितम्॥
विषमत्यर्थमुष्णञ्च तीक्ष्णञ्च कथितं यतः।
अतः सर्व्वविषे युक्तः परिषेकस्तु शीतलः॥
औष्ण्यात्तैक्ष्ण्यादिशेषेण विषं पित्तं प्रकोपयेत्।
वामितं सेचयेत्तस्माच्छीतलेन जलेन च॥
पाययेन्मधुसर्पिर्भ्यां विषघ्नं भेषजं द्रुतम्।
भोक्तुमन्नं रसं दद्यात् चर्व्वयेन्मरिचानि च॥
यस्य यस्य च दोषस्य पश्येल्लिङ्गानि भूरिशः।
तस्य तस्यौषधैः कुर्य्याद्विपरीतगुणैः क्रियाम्॥
शालयः षष्टिकाश्चैव कोरदूषाः प्रियङ्गवः।
भोजनार्थे विषार्त्तानां हिताः पटुषु सैन्धवम्॥"
प्रियङ्गुः कङ्गुः।
"मूलत्वक्फलपुष्पाणि बीजञ्चेति शिरीषतः।
गवां मूत्रेण संपिष्टं लेपाद्विषहरं भवेत्॥
दूषीविषार्त्तः सुस्निग्धमूर्द्ध्वं चाधश्च शोधितम्।
पाययेदगदं सम्यगिदं दूषीविषापहम्॥
पिप्पलीध्यामकं मांसी लोध्रमेला सुवर्च्चिका।
मरिचं बालकं चैला तथा कनकगैरिकम्॥
क्षौद्रयुक्तः कषायोऽयं दूषीविषमपोहति॥"
ध्यामकं रोहिषम्। तदलाभे उशीरं देयम्।
कनकगैरिकं सोणागेरू इति लोके। अत्यन्त-
मारक्तम्॥*॥ अथ जङ्गमविषस्य चिकित्सा।
"अभया रोचना कुष्ठमर्कपुष्पं तथोत्पलम्।
नलवेतसमूलानि गरलं सुरसां तथा॥
सकलिङ्गं समञ्जिष्ठामनन्ताञ्च शतावरीम्।
शृङ्गाटकं समङ्गाञ्च पद्मकेशरमित्यपि॥
कल्कीकृत्य पचेत् सर्पिः पयो दद्याच्चतुर्गुणम्।
सम्यक्पक्वेऽवतीर्णे च शीते तस्मिन् विनिः-
क्षिपेत्॥
सर्पिस्तुल्यं भिषक् क्षौद्रं सतरत्नं निधापयेत्।
विषाणि हन्ति दुर्गाणि गरदोषकृतानि च।
सर्पाहन्ति विषं सर्व्वं गरैरुपहितां त्वचाम्।
योगजन्मकं कण्डूं मांससादं विषंज्वराम्॥
नाशयत्यञ्जनाभ्यङ्गपानवस्तिषु योजितम्।
सर्पकीटाखुलूतादिदष्टानां विषहृत् परम्॥"
स्वल्पपाशच्छेदि घृतम्।
"धुस्तूरस्य शिफा पेया क्षीरेण परिपाचिता।
अङ्कोठवल्कजा चापि श्वविषघ्नी प्रयत्नतः॥
रजनीयुग्मपत्तङ्गमञ्जिष्ठानागकेशरैः।
शीताम्बुपिष्टैरालेपः सद्यो लूतां विनाशयेत्॥
जीरकस्य कृतः कल्को घृतसैन्धवसंयुतः।
सुखोष्णो मधुना लेपो वृश्चिकस्य विषं हरेत्॥
गन्धमाघ्राय सुदितस्यार्कावर्त्तदलस्य तु।
वृश्चिकेन नरो विद्धः क्षणाद्भवति निर्व्विषः॥"
इति विषाधिकारः। इति भावप्रकाशः॥*॥
पारिभाषिकविषा यथा,—
"न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते।
देवस्वञ्चापि यत्नेन सदा परिहरेत्ततः॥"
इति कौर्म्मे उपविभागे १५ अध्यायः॥

अपि च।
"दुरधीता विषं विद्या अजीर्णे भोजनं विषम्।
विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम्॥
विषं चंक्रमणं रात्रौ विषं राज्ञोऽनुकूलता।
विषं स्त्रियोऽप्यन्यहृदो विषं व्याधिरवीक्षितः॥"
इति चाणक्यम्॥

विषकण्टकिनी, स्त्री, (विषयुक्तः कण्टकोऽस्या अस्तीति। इनिः। ङीप्।) वन्ध्याकर्कोटकी। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—
"वन्ध्याकर्कोटकी देवी कन्यायोगीश्वरीति च।
नागारिर्नक्रदमनी विषकण्टकिनी तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

विषकन्दः, पुं, (विषयुक्तः कन्दो यस्य।) नीलकन्दः। इति राजनिर्घण्टः॥

विषघा, स्त्री, गुडूची। इति शब्दचन्द्रिका॥

विषघाती, [न्] पुं, (विषं हन्तीति। हन + णिनिः।) शिरीषवृक्षः। इति शब्दमाला॥ विषनाशके, त्रि॥

विषघ्नः, पुं, (विषं हन्तीति। हन + टक्।) शिरीषवृक्षः। इति शब्दचन्द्रिका॥ यवासः। विभीतकः। इति राजनिर्घण्टः॥ चम्पकवृक्षः। इति जटाधरः॥ विषनाशके, त्रि॥ (यथा, मनुः। ७। २१८।
"विषघ्नैरगदैश्चास्य सर्व्वद्रव्याणि योजयेत्।
विषघ्नानि च रत्नानि नियतो धारयेत् सदा॥")
विषघ्नौषधानि यथा,—
मनुरुवाच।
"रक्षोघ्नानि विषघ्नानि यानि धार्य्याणि भूभुजा।
अगदादि समाचक्ष्व तानि धर्म्मभृतांवर॥
मत्स्य उवाच।
बिल्वाढ़कायवक्षारं पाटला बाह्लिकोषणा।
श्रीपर्णी शल्लकीयुक्ता निष्क्वाथ्य प्रोक्षणं परम्।
सविषं प्रोक्षितं तेन सद्यो भवति निर्व्विषम्॥१॥
यवसेन्धनपानीयवस्त्रशय्यासनोदनम्।
कवचाभरणं छत्रं बालव्यजनवेश्मनी॥
शेलुः पाटल्यतिविषा शोभी भार्गी पुनर्नवा।
समङ्गावृषमूलत्वक्कपित्थवृषशोणितम्।
सहदन्तशठं तद्वत् प्रोक्षणं विषनाशनम्॥२॥
लाक्षा प्रियङ्गु मञ्जिष्ठा सममेला हरेणुका।
सयष्ट्या मधुना युक्ता बभ्रुपित्तेन कल्किता॥
निखनेद्गोविषाणस्थं सप्तरात्रं महीतले।
ततः कृत्वा मणिं हेम्ना बद्धं हस्तेन धारयेत्।
संस्पृष्टं सविषन्तेन सद्यो भवति निर्व्विषम्॥३॥
मनो जलं शमीपुष्पं दुर्द्दर्भा चैव कर्षकाः।
कपित्थकुष्ठमञ्जिष्ठाः पित्तेन शुद्धाकल्किताः॥
शुनो गोः कपिलायाश्च सौम्याक्षियापरोऽगदः।
विषजित् परमं कार्य्यं मणिरत्नञ्च पूर्व्ववत्।
मूषिका जतुका वापि हस्ते बद्धा विषापहा॥४॥
हरेणु मांसी मञ्जिष्ठा रजनी मधुका मधु।
अक्षत्वक् सुरसं लाक्षाश्वपित्तं पूर्व्ववद्भुवि॥
वादित्राणि पताकाश्च पिष्टैरेतैः प्रलेपिताः।
श्रुत्वा दृष्ट्वाथ चाघ्राय सद्यो भवति निर्व्विषः॥५॥
त्र्यूषणं पञ्चलवणं मञ्जिष्ठा रजनीद्वयम्।
सूक्ष्मैला त्रिवृतापत्रं विडङ्गमिन्द्रवारुणी॥
मधुकं वेतसं क्षौद्रं गोविषाणे निधापयेत्।
तस्मादुष्णाम्बुना मात्रा प्रागुक्तं योजयेत्तथा।
विषं भुक्तं जारयति निर्व्विषेऽपि न दोषकृत्॥६॥
सक्तुं सर्ज्जरसोपेतं सर्षपा एलवालुकैः।
सुवर्णा तस्करतरोः कुसुमैरर्ज्जुनस्य तु॥
धूपो वासगृहे हन्ति विषं स्थावरजङ्गमम्।
न तत्र कीटाः सविषा न दर्द्दुरसरीसृपाः।
न कृत्या कर्म्मणस्तत्र धूपोऽयं यत्र दह्यते॥७॥
कल्कितैश्चन्दनक्षीरपलाशद्रुमवल्कलैः।
दूर्व्वैलावालुसुरसानाकुलीतण्डुलीयकैः।
क्वाथः सर्व्वोदकार्थेषु काकमाचीयुतैर्हतः॥८॥
रोचनापत्रनेपालीकुङ्कुमैस्तिलकोऽन्वहम्।
विषैर्न बाध्यते स्याच्च नरनारीनृपप्रियः॥९॥
चूर्णैर्हरिद्रामञ्जिष्ठाकिणिहीकणनिम्बजैः।
दिग्धं निर्व्विषतामेति गात्रं सर्व्वविषार्द्दितम्॥१०
शिरीषस्य फलं पत्रं पुष्पं त्वङ्मूलमेव च।
गोमूत्रघृष्टो ह्यगदः सर्व्वकर्म्मकरः स्मृतः॥११*
एकवीरमहौषध्यः शृणु चातः परं द्विज।
वन्ध्याकर्कोटकी राजन् विष्णुक्रान्ता तथोत्कटा।
शतमूली शतानन्दी बला मोचा पटोलिका॥
सोमा पिण्डनिशा चैव तथा दग्धरुहा च या।
स्थले कमलिनी या च विशाली शङ्खमूलिका॥
चण्डाली हस्तिचण्डाली गोचण्डाली च
गन्धिका।
रक्ता चैव महारक्ता तथा बर्हिशिखा च या।
कोषातकी नक्तमाला पियाला सुभलच्छणा।
वारुणा च सुगन्धा च तथा वै गन्धनाकुली॥
ईश्वरी च शिलीन्ध्री च सोमली वंशतालिका।
जतुकाली महाश्वेता श्वेता च मधुयष्टिका॥
वज्रटः पारिभद्रश्च तथा वै सिन्धुवारिका।
जीवानन्दा वसुमती नतनागरकण्टकी॥
तालता जालयातालता तथा च वटपत्रिका।
कार्त्तस्वरी महानीला कट्फलं हंसपादिका॥
मण्डूकपर्णी वाराही द्वे तथा तण्डुलीयके।
सर्पाक्षी लवणा ब्राह्मी विश्वरूपा सुखङ्करी॥
रुजापहा वृद्धिकरी तथा शल्यापहा च या।
पत्रिका रोहिणी चैव रक्तमाला महौषधी॥
तथामलकवन्दाकं या च चित्रा पटोलिका।
काकोली क्षीरकाकोली पीलुपर्णी तथैव च॥
केशिनी वृश्चिकाली च महानागा शतावरी।
तथा गरुड़वेगा च स्थले कुमुदिनी तथा॥
स्थले चोत्पलिनी या च महाभूमिलता च या।
उन्मादिनी सोमराजी सर्व्वरत्नानि पार्थिव॥
विशेषान्मरकतादीनि कीटपक्षं विशेषतः।
जीवजाताश्च मणयः सर्व्वे धार्य्या विशेषतः॥*॥
रक्षोघ्नाश्च यशस्याश्च तथा वेतालनाशनाः।
विशेषान्नरनागाश्च गोखरोष्ट्रसमुद्भवाः॥
सर्पतित्तिरिगोमायुबभ्रुमण्डूकजाश्च ये।
सिंहव्याघ्रर्क्षमार्ज्जारद्वीपिवानरसम्भवाः॥
कपिञ्जलाश्च गोधाद्यिमहिषेषु भवाश्च ये।